Roll No. ..............................

# D–3337

## B. A. (Classics) (Part II) EXAMINATION, 2020

**(Compulsory)**

Paper First

SAHITYAM

*Time : Three Hours ]* *[ Maximum Marks : 75*

**सूचना :** सर्वे प्रश्नाः समाधेयाः।

1. कयोश्चिद् **द्वयोः** पद्ययोः सप्रसङ्गं व्याख्या कार्या— प्रत्येक 10

(i) आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥

(ii) ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः;
पश्चार्धेनप्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥

(iii) यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः॥





(iv) आजन्मनः शाठ्यमशिक्षितो य-
स्तस्याप्रमाणं वचनं जनस्य।
परातिसन्धानमधीयते यै-
र्विद्येति ते सन्तु किलाप्तवाचः॥

2. शकुन्तलायाः चरित्रचित्रणं कुर्यात्। 10

**अथवा**

अभिज्ञानशाकुन्तलस्य प्रथमाङ्कस्य कथासारः लेख्यः।

3. हर्षचरितस्य प्रथमोच्छ्वासस्य कथासारः लेख्यः। 10

**अथवा**

'बाणोच्छिष्टं जगत् सर्वं' इति विवेच्यताम्।

4. कस्यचिदेकस्य गद्यांशस्य व्याख्या कार्या— 10

अथ तां तथा शप्तां सरस्वतीं दृष्ट्वा पितामहो भगवान्कमलोत्पत्तिलग्नमृणालसूत्रामिव धवलयज्ञोपवीतिनीं तनुमुद्वहन्, उद्गच्छदच्छाङ्गुलीयमरकतमयूखलताकलापेन त्रिभुवनोपप्लवप्रशमकुशापीड धारिणेव दक्षिणेन करेण निवार्य शापकलकलम्, अतिविमलदीर्घैभाविकतयुगारम्भसूत्रपातमिव दिक्षु पातयन् दशनकिरणैः सरस्वतीप्रस्थानमङ्गलपटहेनेव पूरयन्नाशाः, स्वरेण सुधीरमुवाच-ब्रह्मन् न खलु साधु सेवितोऽयं पन्थाः येनासि प्रवृत्तः।

अथवा

अथ गते तस्मिन् पर्यस्ते च वासरे संघट्टमानरक्तपङ्कजसंपुटपीयमान एव क्षयिणि क्षामतां व्रजति बालवायसास्यारुणेऽपराह्णातपे, शिथिलितानिजदाजिजवे जपापीडपाटलिम्न्यस्ताचलशिखरस्खलिते खञ्जतीव कमलिनीकण्टकक्षतपादपल्लवे पतङ्गे, पुरः परापतति प्रेङ्खदन्धकारलेशलम्बालके शशिविरहशोकश्याम इव श्यामामुखे, कृतसंध्योपासनः शयनीयमगात्।

5. कस्यचि**दैक**स्य परिचयो देयः— 10

(i) प्रतिमानाटकम्

(ii) कादम्बरी

(iii) कर्पूरमञ्जरी

6. **द्वयोः** नाटकयोः वैशिष्ट्यं प्रतिपादयत्— प्रत्येक $7\frac{1}{2}$

(i) विक्रमोर्वशीयम्

(ii) मृच्छकटिकम्

(iii) मालविकाग्निमित्रम्

(iv) मालतीमाधवम्

(v) वेणीसंहारम्